सने "ये मन्दास्ते तु सञ्जन्ते ब्रह्मणोरूपकल्पने" इत्युक्तेः। अतएवोक्तम् "प्रशान्तचित्ताय जितेन्द्रियाय प्रक्षीणदोषाय यथोक्तकारिणे—प्रदेयमेतत् सततं मुमुक्षवे" इति। अत्र यथोक्तकारिणे इत्यनेन प्राक् ज्ञानोत्पत्तेः वर्णाश्रमविहितं कर्म्मानुष्ठेयमेवेत्युक्तं शा० सूत्रकृतापि "विहितत्वादाश्रम कर्म्मापि" इत्युक्तम् गीतायामपि "आरुरुक्षोर्मुनेर्योगं कर्म्म कारणमुच्यते। योगारूढस्य तस्यैव शमः कारणमुच्यते" इत्यनेन आरुरुक्षोः यथोक्तकर्म्माधिकारः उक्तः "कषाये कर्म्मभिः पक्वे ततोज्ञानं प्रजायते" इत्यनेन कषायशब्द-वाच्यचित्तदोषक्षयार्थं कर्म्मावश्यकतेत्युक्तम्। "द्वे ब्रह्मणी वेदितव्ये परञ्चापरमेव चेति" श्रुतावप्यधिकारिभेदात् निराकरणोपाधिकयोः द्वयोर्ब्रह्मणोर्वेद्यतोक्ता। गीतायामपि "लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयानघ! ज्ञानयोगेन साङ्ख्यानां, कर्म्मयोगेन योगिनामिति" अधिकारिभेदात् ज्ञानकर्म्मणोरधिकार इत्युक्तम्। "सम्यक् संसाधनं कर्म्म कर्त्तव्यमधिकारिणा। निष्कामेण सदा पार्थ! काम्यं कामान्वितेन चेति" भवि०पु०। "अधिकारिणाऽर्थिना विदुषा समर्थेनेति" रघु० तेन विद्वत्त्वं तत्तत्कर्मजन्यफलार्थित्वम् तत्तत्कर्म्मकरणयोग्यत्वम् अपर्य्युदस्तत्वञ्च अधिकारिताप्रयोजकम्। तत्र फलार्थित्वञ्च सति कामे एव, मुमुक्षुत्वे तु न फलार्थित्वावश्यकतेति भेदः। मार्कण्डेयपुराणे रुचिवाक्ये न "पितृन्नमस्ये दिवि ये च मूर्त्ताः स्वधाभुजः काम्यफलाभिसन्धौ। प्रदानशक्ताः सकलेप्सितानां विमुक्तिदा येऽनभिसंहितेष्विति" अनेन फलार्थिनं प्रति तत्तत्फलदातृत्वं, तदनर्थिनं मुमुक्षुं प्रति मुक्तिदातृत्वमिति स्पष्टमुक्तम् एवं देवतानामप्यधिकारिभेदेन फलदातृत्वम्। अनभिसंहितेषु अनुद्दिष्टेषु फलेष्वित्यर्थः। अधिकारोऽस्यस्य इनि। स्वामित्ववति "सर्वे स्युरधिकारिण" इति स्मृतिः स्त्रियां ङीप्। "कृतान देवी वचनाधिकारिणीति नैष०।

**अधिकार्थवचन** न० अधिकार्थस्य स्तुतिनिन्दाभ्यामारोपितस्य वस्तुधर्म्मादतिरिक्तस्य गुणस्य वचनम्। स्तुत्यर्थवादे, निन्दार्थवादे च। यथा वातच्छेद्यं तृणमित्यत्र दुर्बलत्वेन निन्दा, काकपेया नदीत्यत्र च पूर्णजलत्वेन स्तुतिः गम्यते "कृत्यैरधिकार्थवचने" इति पा०।

**अधिकाम** पु० अधिकः कामः। अत्यन्ताभिलाषे। ब०। तद्वति त्रि०। कामे विभक्त्यर्थे अव्य०। काममधिकृत्य इत्यर्थे अव्य०।

**अधिकृच्छ्र** पु० अधिकं कृच्छ्रं कष्टं साधनतयाऽस्यस्य अच्। "बिल्वैरामलकैर्वापि कपित्थैरथवा शुभैः। मासेन लोके ऽधिकृच्छ्रः कथ्यते द्विजसत्तमैः" इति (गरुडपु०) उक्ते मास-साध्ये व्रतभेदे। प्रा०स०। अधिककष्टे न०। तद्वति त्रि०।

**अधिकृत** पु० अधि+कृ—क्त। आयव्ययाद्यवेक्षके, अध्यक्षे कर्म्मजन्यफलसम्बन्धिनि नियुक्ते, स्वामित्ववति च त्रि०। "महीपतीनां पृथगर्हणार्थं समादिदेशाधिकृतानधि—श्रीरिति" रघुः।

**अधिकृति** स्त्री अधि+कृ—क्तिन्। अधिकारे। [आरोहणे।

**अधिक्रम** पु० अधि+क्रम—भावे घञ् अमन्तत्वान्न वृद्धिः।

**अधिक्षित्** त्रि० अधि+भावे कर्त्तरि वा क्विप्—तुक् च। परि-क्षये, तत्कारिणि च। "विशामासामभयानामधिक्षितम्" ऋ० १०,९२,२४।

**अधिक्षिप्त** त्रि० अधि+क्षिप—क्त। स्थापिते, निन्दिते, कृता-धिक्षेपे, प्रेरिते, तिरस्कृते च।

**अधिक्षेप** पु० अधि+क्षिप—भावे घञ्। तिरस्कारे, स्थापने, प्रेरणे च।

**अधिगत** त्रि० अधि+गम कर्म्मणि—क्त। प्राप्ते, ज्ञाते च। "अधिगतं विधिवत् यदपालयदिति" रघुः "अधिगतसकलकलाकला-पकमिति" काद०। अधिगताखिलवेदार्थ" इति वे०सा०।

**अधिगम** पु० अधि+गम—घञ्। ज्ञाने, प्राप्तौ, स्वीकारे च। "अध्यात्मयोगाधिगमेनेति" गीता। निध्यादेः प्राप्तौ च। "स्वामी ऋक्थक्रयसंविभागपरिग्रहाधिगमेष्विति" गौत०। "अधिगमो निध्यादेः प्राप्तिरिति" मिता०।

**अधिगव** अव्य० गवि विभक्त्यर्थे अव्ययी० वेदे अच् समा०। गवीत्यर्थे "स्वादीयो यदधिगवं क्षीरमिति" वेदः।

**अधिगुण** पु० अधिको गुणः प्रा०स०। अतिशयितविनयादि-गुणे। ब०। तद्वति त्रि०। "याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा" इति नीति०। गुणे—विभक्त्यर्थे अव्ययी०। गुणमधिकृत्य इत्यर्थे अव्य०। अधिगतो गुणो येन। ज्याधिरूढे धनुषि न०।

**अधिजिह्व** पु० अधिका जिह्वा यस्य। द्विजिह्वे सर्पे तस्य द्विजिह्वत्वञ्च अमृतास्वादाशया कुशविलेहनात्। यथोक्तं भा०आ०प०। "यत्रैतदमृतञ्चापि स्थापितं कुशसंस्तरे। तद्विज्ञाय हृतं सर्पाः प्रतिमायाकृतञ्च तत्। सोमस्थान-मिदञ्चेति दर्भांस्ते लिलिहुस्तदा। ततो द्विधा कृता जिह्वा सर्पाणां तेन कर्म्मणा। अभवंश्चामृतस्पर्शाद्दर्भास्तेऽथ पवित्रिणः। एवं तदमृतं तेन हृतमाहृतमेव च। द्विजिह्वाश्च कृताः सर्पा गरुडेन महात्मना" इति।